# Shri Shivastavagadyam

# श्रीशिवस्तवगद्यम्

## Document Information

Text title : Shri Shivastavagadyam 02 02

File name : shivastavagadyam.itx

Category : shiva, gadyam

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-02

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# श्रीशिवस्तवगद्यम्

त्रैलोक्यस्य भवानेव निग्रहानुग्रहक्षमः ।
श्रीविश्वेश्वर मां पाहि महेश्वर निरीश्वर ॥ (गिरीश्वर)
जय जय श्रीरुद्र वीरभद्र । विरिञ्चिपञ्चमशिरःखण्डन
यज्ञपुरुषशिरःखण्डन दक्षप्रजापतिशिरःखण्डन
देवेन्द्रशिरःखण्डन पूषादित्यदन्तप्रहरण
खगादित्यनेत्रसंहारक गीर्वाणजननीनासिकाच्छेदक
सरस्वतीनासिकाच्छेदक हव्यवाहनजिह्वासमुत्पाटक
ईशानादिदिक्पालकप्राणोत्पाटन पादाङ्गुष्ठातिनिष्ठुर-
प्रपीडितरोहिणीवल्लभ चरणदलशिरोविघातन
प्रसादितगौतमकश्यपाङ्गिरस पुरोगममुनिवल्लभ
पुण्डरीकलोचनोत्तमाङ्गविनिपातितसमस्तदेवताविघातन
नारायणभुजस्तम्भन बादरायणभुजस्तम्भन
कन्दर्पदर्पोरुविपिनदावानल त्रिपुरपयोराशिबाडबानल
सनत्कुमारगर्वपर्वतभस्मसात्करणकारण
नरसिंहदर्पप्रविमर्दनकारण ब्रह्मविष्णुमदाभिमाननिदानविघातन
विद्युत्समानाद्यवसानकमहादहन जटिलितमहितोरुलिङ्गविग्रह
कालकूटानुग्रह देव ॥ १॥

लीलावलोकन ललाटलोचनप्रज्वलनज्वालावलीभस्मीभूतनन्दादिगोमास्त्र-
समूहदूरीभूतभक्तजनमलयातिसंहारकारणप्रवाह देव ॥ २॥

विद्युन्मालिकासुर-तारकासुर-अन्धकासुर-जलन्धरासुर-लालासुर-
भस्मासुर-जाटासुर-रावणासुर-व्यघ्रासुर-गजासुरादि-
नानाजगत्कण्टकमहासुरमदप्रभञ्जन
प्रेतपतिमदभञ्जन सहस्रलोकसाधारणजन्मजरामरणनिवारण ।
अपि च देव ॥ ३॥

श्रीमन्महादेवीश्रीपर्वतप्रिय कैलासप्रिय अविमुक्तप्रिय
केदारप्रिय पार्वतीप्रिय कुमारप्रिय विनायकप्रिय
नारायणप्रिय नन्दिकेश्वरप्रिय महाकालप्रिय कालरुद्रप्रिय
वीरभद्रप्रिय भृङ्गीरिटिप्रिय चण्डेश्वरप्रिय चण्डकीर्तिप्रिय
गोकर्णभद्रकर्णलम्बकर्णकुम्भकर्णवराहकर्णगजकर्णघण्टाकर्णप्रिय
महालय महाव्रत माहेन्द्र महाबाहुप्रिय अतिहासाट्टहासगुहावास
गुहेश्वर हाटकेश्वर भस्मेश्वर अर्धनारीश्वर
प्रिय-श(त)जिह्व-शतोदर-सहस्रोदर-वज्रमध्योदर-
जिह्मोदर-लम्बोदर-कुम्भोदरप्रिय
हव्यवाहनसिंहूर्तकसंवर्तकमेघावर्तकप्रिय
कुन्दतरुमुदक-पिम्पलपिङ्गलमधुपिङ्गलप्रिय
विश्वरूप-विरूपाक्ष-पञ्चाक्ष-शताक्ष-सहस्राक्षप्रिय
प्रपञ्चान्तक लोकान्तक यमहर मृत्युहरप्रिय यशस्विभास्कर
दक्षभास्कर काष्ठकाल-कूटधूमकेतुप्रिय यमेहान्दोलक
नीलकोकिल पूर्णभद्रसद्योजात ब्रह्मभक्षण विषभक्षण
भृगुजटिलमुण्डधरशिखण्डधरप्रिय केशमहाकेशीज्वलन
सूर्यवर्ण सोमवर्ण सूर्याक्ष सोमाक्ष सूर्यपेषण चन्द्रपेषण
इन्द्रेन्द्र यमेन्द्र मेरुपातन- विन्ध्यपातनप्रिय शतमाय
महामाय लिङ्गाक्ष पिङ्गलाक्ष पर्वतास्य पिशाचास्य
प्रकुन्दकुन्ददन्तराद्रिसुन्दर सर्वभूतविजृम्भणप्रिय
अर्धमुण्डार्धवक्रार्धनासिकार्धदेहसार्ध घटनार्ध
भगललाट भगनन्दन भगनासिक भगनेत्र
हरप्रिय वारिवाह-वराहपिप्पलायुधाङ्गारकभक्षण
द्विशिखत्रिशिखपञ्चशिखदीर्घह्रस्वस्थूलसूक्ष्म गुरुलघु
वज्रपाणिचक्रपाणिप्रिय श्रेष्ठविक्रमाद्रिसोम नन्दिनारायण
श्रीधरश्रीपतिसर्वाङ्गशिरश्छेद नारदनागदन्तपुष्पदन्तप्रिय
ओङ्कारवषङ्कारसुगमसूत्रपीठनलोक सारयज्ञहर दक्षहर
यूपोत्पाटनाग्निजिह्वासमुत्पाटन निकुम्भक्षेत्रज्ञ क्षेत्रभानुकम्पप्रिय
असितवामदेवचक्रायुधकूश्माण्डकङ्कणकाकपाद-कालविमर्दनप्रिय
कटकटकङ्कटसङ्कटप्रिय एकवक्र-बहुवक्रास्यवक्र
सिंहवक्रशार्दूलवक्र-हरिणवक्र-कोकिलवक्र-वक्रोलकवक्रानेकवक्रप्रिय
शिष्टाष्टपुष्टविश्वम्भरादिकष्ट-विमर्दनप्रिय

खण्डरुण्डाभरण चण्डाभरण फणिभूषण नानाप्रमथ
गणनायकप्रिय कुञ्जरमुखप्रिय षडाननप्रिय ऋभूपमन्यु
?? वागास्य श्वेत मुनिमार्कण्डेयप्रिय सनकसनन्दनसनत्कुमारप्रिय
विभूतिप्रिय रुद्राक्षप्रिय पञ्चामृतप्रिय पञ्चगव्यप्रिय
चन्दनकुङ्कुमगोरोचनप्रिय नीलोत्पलरक्तोत्पलमहोत्पलप्रिय
महिषाक्षगुग्गुलुधूपप्रिय कर्पूरदीपप्रिय गीतप्रिय वाद्यप्रिय
कृष्णाष्टमीप्रिय कृष्णचतुर्दशीप्रिय अवधूतप्रिय भोजराजप्रिय
मलयराजप्रिय श्रीदण्डीप्रिय मेधाविरुद्धप्रिय भट्टबाणप्रिय
उद्भटप्रिय केशिरालप्रिय दास- मय्यप्रिय वरगुण्डप्रिय
अण्डवरदप्रिय मल्हणप्रिय बल्लाडप्रिय कुमरगुण्डय्यप्रिय
अखिलभुवनजभक्तजनप्रिय देव ॥ ४॥

सुरपतिप्रमुखनिखिलप्रार्थितप्रधानपरमेश्वर देव नमस्ते
नमस्तेनमस्ते नमः ॥ ५॥

श्रीमन्माहेश्वरः शिष्यो मल्लिकार्जुनपण्डितः ।
श्रीमुखदर्शनगद्यं हृद्यं ग्रथितवान् (मुदा) ।

॥ इति श्रीशिवस्तवगद्यं सम्पूर्णम् ॥

Proofread by Aruna Narayanan

*Shri Shivastavagadyam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*